**PAPER - 1**

# MT

**2017 .... .... 1200**

**Seat No.** | | | | | | | |

**MT - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - II PAPER - I**

**Time : 3 Hours** **(Pages 9)** **Marks : 80**

## प्रथमः विभागः - गद्यम् ।

**प्र.१. अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

पारम्परिक-ऊर्जासाधनानाम् उपयोगः विचारपूर्वकं कर्तव्यः यतः ........ ।

(तेषाम् उपलब्धिः अमर्यादिता । / तेषाम् उपलब्धिः मर्यादिता ।)

II) पूर्णवाक्येन उत्तरत । १

जैविकवायुः कस्मात् प्रभवति ?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १

सौरं स्रोतः प्रदूषणमुक्तम् ।

श्रेया - पारम्परिकाणि अपारम्परिकाणि च तस्याः साधनानि । कृष्णाङ्गाराः, खनितैलं, नैसर्गिकवायुश्चेति पारम्परिकाणि। दशलक्षाधिकवर्षेभ्यः पूर्वं निर्जीवीभूताः प्राण्यंशाः सस्यांशाश्च मृत्तिकायाः महाशिलानां च बहुभारेणान्तः सम्पीडनाद् द्रववायुरूपं प्राप्नुवन्ति। तद् द्रवरूपेन्धनम् अपरिष्कृतं तैलमित्युच्यते । तदेव कृष्णसुवर्णमिति ।

पार्थः - तस्योपस्कारार्थं महाप्रयासः आवश्यकः । भूमौ रन्ध्रं निर्माय निष्कास्य च तस्य संस्करणं क्रियते । तत्संस्करणाद् इन्धनतैलं, मृत्तैलं, स्वेदनतैलादिकं निष्पाद्यते । एतन्निसर्गाल्लभ्यते, तस्मात्तस्योपलब्धिः मर्यादिता ।

श्रेया - निसर्गात् प्राप्ता अपारम्परिकी ऊर्जा तु अमर्यादा भवति ।

पार्थः - सूर्यः, पवनः, जलमित्येतानि महाभूतानि । एतानि अपारम्परिकाणि ऊर्जासाधनानि अपि ऊर्जां निर्मातुं समर्थानि । गोमयात्, पर्णावशेषाद्, अवकराच्च जैविकवायुः प्रभवति तथा एरण्डबीजान्मधुकबीजादीक्षुदण्डावशेषाच्च जैविकतैलं निर्मीयते । अणुभ्योऽपि ऊर्जा लभ्यते ।

श्रेया - तथापि एतेषु सौरं स्रोतः अपरिमितम् अक्षयं, प्रदूषणमुक्तं च । 'कोराडी' इत्यत्र औष्णिक्याः ऊर्जायाः प्रकल्पः तथा ट्रॉम्बेतारापुरापुरस्थौ द्वौ अणुविद्युत्प्रकल्पौ प्रसिद्धौ । कोयना-जल-विद्युत्प्रकल्पस्तु अर्वाचीनमहाराष्ट्रस्य भाग्यरेषैव ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) उचितं पर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत । १

१) अवकराच्च = ...... + ......। (अवकराच् + च / अवकरात् + च)

२) भाग्यरेषैव = ...... + ......। (भाग्यरेषा + एव / भाग्यरेषा + इव)

II) मञ्जूषातः उचितं पर्यायशब्दं चित्वा लिखत । १

१) भूमिः = .........। २) रन्ध्रम् = .........।

(अवनी / तटिनी / छिद्रम् / कोटरम्)

III) योग्ये विशेषणे चित्वा लिखत । १

१) .......ऊर्जासाधनानि । (महाभूतानि / अपारम्परिकाणि)

२) ........सौरस्रोतः । (अक्षयम् / औष्णिकम्)

IV) गद्यांशे आगते २ पूर्वकालवाचक - धातुसाधित - अव्यये ...... , ...... । १

३. **स्वमतप्रकटनम् ।** २

आधुनिककाले अपारम्परिक - ऊर्जासाधनानि आवश्यकानि वा न इति माध्यमभाषया लिखत ।

**प्र.१. ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) माहात्म्यनिश्चितिसमये लेरसियामहोदयः ...... वा ...... न गणयति स्म । (धनवत्तां / सहृदयतां) (क्षमाशीलतां / दारिद्र्यं) १

II) पूर्णवाक्येन उत्तरत । १

ग्रामं प्रविश्य लेरसियामहोदयः सहकारिणश्च कुत्र स्थिताः ?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

रूपपरिवर्तनेन लेरसियामहोदयः कुरूपः अभवत् ।

पुरा यदा मिझोजनाः गणान् कृत्वा वसन्तः तदा तेषामेकस्य गणस्य प्रमुख आसीत् लेरसियानामा । अतीव दयालुः स गणप्रमुखः सर्वैः सह समभावेन आचरति स्म । धनवत्तां दारिद्र्यं वागणयित्वा स जनानां सहृदयतया साधुतया वा तेषां माहात्म्यं निश्चिनोति स्म । कदाचित् सः स्वसहकारिभिः सह दूरवर्तिनं कञ्चन ग्रामं गतः । तत्पूर्वं कदापि स तत्र न गतवान् । ग्रामप्रवेशात् प्राक् लेरसिया आत्मानं कशाघातैः व्रणितं कृतवान् । कस्याश्चिदोषधेः अङ्गरसस्य विलेपनमपि स्वशरीरे तेन कृतं यतस्तस्य शरीरमुच्छूनं रूपहीनं रुग्णमिव च दीनं समजायत । तस्योपरि तेन मृत्तिकापि लिप्ता यतः स दीनतरोऽदृश्यत । तदनु स सहकारिभिः सह तद् ग्रामं प्रविश्य मध्यचतुष्पथं यातः । तत्र ते सर्वे मार्गे समुपाविशन् । तत्रस्था ग्रामवासिन एतावदेव जानन्ति यदागता जनाः ख्यातकीर्तेः लेरसियामहोदयस्य जनपदतः वर्तन्ते परं न कोऽपि जानाति स्म तेषु कतमः लेरसिया इति ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) रिक्तस्थानपूर्तिं कुरुत । १

१) वागणयित्वा = वा + ....... ।

२) कस्याश्चिदोषधेः = .......+ औषधेः ।

II) चतुर्थपदं लिखत । १

१) अभद्रम् : रूपहीनम् :: पथि : ....... ।

२) धनवत्ता : दारिद्र्यम् :: दुष्टता : ....... ।

III) विशेषण - विशेष्य - अन्वितिः । ....... , ....... शरीरम् । १

IV) गद्यांशे आगते द्वे पूर्वकालवाचक-धातुसाधित-अव्यये चित्वा लिखत । १

**३. पृथक्करणम् ।**

**यथाक्रमं घटनाः लिखत ।** २

i) मृत्तिकायाः लेपः ।

ii) कशाघातैः व्रणनम् ।

iii) दीनतरं / जुगुप्साकरं दर्शनम् ।

iv) अङ्गरसस्य विलेपनम् ।

**प्र.१. क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

रॉथफिल्डमहोदयेन विनायकः जे.जे. महाविद्यालयं प्रवेशितः यतः ......... ।

(प्रवेशपरीक्षा उत्तीर्णा / तस्य चित्रं दृष्ट्वा रॉथफिल्डमहोदयः प्रभावितः)

II) पूर्णवाक्येन उत्तरं लिखत । १

विनायकस्य रुचिः कस्मिन् आसीत् ?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

विनायकः उच्चशिक्षणात् अनन्तरं भारतदेशं प्रत्यागतवान् ।

एष विनायकः नाम बालः बाल्य एव पित्रा सह मृत्प्रतिमाः निर्मातुं प्रारभत । विविधप्राणिनां देवतानां च प्रतिमानिर्माणे तस्यासीद् रुचिः । पुस्तकस्थानां विविधचित्राणां पुनर्विलेखनेऽपि स मग्न आसीत् । सततं निरीक्षमाणेन तस्य पित्राऽपि तस्मिन् समुचितसंस्काराः समारोपिताः। एकदा ग्रामस्थराममन्दिरेऽनेन छत्रपतिशिवरायस्य चित्रं विलेखितम् । तस्मिन् समये अलिबागमण्डलाधिकारी ऑटोरॉथफिल्डमहोदयः ग्रामस्य व्यवस्थापननिरीक्षणार्थमागतः । दृष्टमात्रे तस्मिन् चित्रे तन्मनः प्रहृष्टम् । अतस्तेन विनायकः मुम्बईस्थिते जे. जे. महाविद्यालयं प्रवेशितः। तत्रापि स्वप्रतिभया कौशल्येन च विनायकेन प्रथमः क्रमाङ्कः प्राप्तः । समाप्तेऽध्ययने रॉथफिल्डमहोदयेन गुरुवर्य-रवीन्द्रनाथटागोरमहोदयेन सार्धमस्य परिचयः कारितः। गुणी गुणिनं वेत्तीति सूक्त्यनुसारं रवीन्द्रनाथेन कोलकत्तानगरं स निमन्त्रितः । तत्र विनायकेन बेल्लूरमठस्य कृते श्रीरामकृष्णपरमहंसमहोदयस्य पूर्णाकृतिः प्रतिमा निर्मिता । रवीन्द्रनाथ-गान्धीमहोदयादीनां प्रतिमानिर्माणे रतस्यास्य कौशल्यं ज्ञात्वा टाटाकम्पनीप्रमुखेण स प्रगतशिक्षणार्थं लण्डनस्थितां रॉयलअॅकॅडमीसंस्थां प्रति प्रेषितः । तत्रापि प्रावीण्यं संप्राप्य स इटली-फ्रान्स-स्वित्झर्लण्डादिदेशस्थान् शिल्पकारान् मिलित्वा, तेषां च कलाकृतीनामध्ययनं कृत्वा स्वदेशं प्रत्यागतः ।

२. **शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) रिक्तस्थानपूर्तिं कुरूत । १

१) वेत्तीति = ..... + इति । २) अतस्तेन = अतः + ..... ।

II) समूहेतरशब्दौ चिनुत । १

१) कौशल्यम्, प्रावीण्यम्, वैविध्यम्, नैपुण्यम् ।

२) प्रतिमा, चित्रम्, मूर्तिः, पुत्तलः ।

III) विशेषण-विशेष्य-अन्वितिः । १

१) मनः : प्रहृष्टम् :: क्रमाङ्कः : ........ ।

२) प्रतिमा : पूर्णाकृतिः :: संस्काराः : ........ ।

IV) गद्यांशात् चित्वा के अपि द्वे पूर्वकालवाचक-धातुसाधित-अव्यये लिखत । १

३. **पृथक्करणम् । जालचित्रं पूरयत ।** २




**द्वितीयः विभागः - पद्यम् ।**

प्र.२. अ) **पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

१. **पृथक्करणम् । (कः वदति इति लिखित्वा स्तम्भपूरणं कुरुत ।)** २

i) सिकताभिः गङ्गायां कदाचन सेतुः बध्यते ।

ii) प्राणिनां ताराय गङ्गायां सेतुं बध्नामि ।

iii) त्वं विद्यां साधयितुं कस्मात् उद्यतः ?

iv) हे मूर्ख, सेतुः किं बध्यते ?

| द्विजाकृतिः इन्द्रः | तपोदत्तः |
| --- | --- |
| | |

निर्बन्धपृष्टः स च तं शक्रोऽवादीत् द्विजाकृतिः ।
सेतुं बध्नामि गङ्गायां ताराय प्राणिनामिति ॥१॥
ततोऽब्रवीत् तपोदत्तः सेतुः किं मूर्ख बध्यते ।
गङ्गायामोघहार्याभिः सिकताभिः कदाचन ॥२॥
तच्छ्रुत्वा तमुवाचैवं शक्रोऽथ द्विजरूपधृक् ।
यद्येवं वेत्सि तद् विद्यां विना पाठं विना श्रुतम् ॥३॥
कस्माद् व्रतोपवासादिभिस्त्वं साधयितुमुद्यतः ।
इयं शशविषाणेच्छा व्योम्नि वा चित्रकल्पना ॥४॥
अनक्षरो लिपिन्यासो यद् विद्याध्ययनं विना ।
एवं यदि भवेदेतन्नह्यधीयीत कश्चन ॥५॥

**२. तपोदत्तस्य विद्यासिद्धये उपायः अयोग्यः इति इन्द्रः कथं स्पष्टीकृतवान् इति माध्यमभाषया लिखत ।** २

**प्र.२. ब) पद्यांशौ पठित्वा निर्दिष्टे कृती कुरुत ।**

**१. शब्दज्ञानम् ।**

I) चतुर्थपदं लिखत । १

१) जयतु जवानः : रक्तवर्णः :: जयतु विज्ञानम् : ..........

२) कृष्णः : श्वेतः :: विफलता : ..........

II) विशेषण-विशेष्य अन्वितिः । १

१) .......... राष्ट्रध्वजम् । २) .......... ऐन्द्रजालिकैः ।

अणुशास्त्रे वा विज्ञाने वा
सङ्गणकीये पोखरणे वा
ऐन्द्रजालिकैराधुनिकैर्यत् प्रावीण्यं प्राप्तम्
ध्वजमध्ये तद् यशो धवलतामाप्त्वा सङ्कलितम् ।
ध्वजमध्यस्थो धवलिमा च मामुत्साहयतेऽयम्
भावोत्कटता मुखरयते मां 'जयतु च विज्ञानम्' ॥१॥
त्यागसुरक्तः कृषिभिर्हरितः
वैज्ञानिकयशसा च श्वेतः ।
त्रयोऽपि वर्णाः प्रदत्ताश्च यैर्ध्वजाय चास्माकम्
जयतु जवानो, जयतु किसानो, जयतु च विज्ञानम् ।
नमामि राष्ट्रध्वजं त्रिवर्णात्मकं नैकवारम्
स्मारयते मां कीर्तिकथा यो महतामनवरतम् ॥२॥

**२. अन्वयपूर्तिः ।** २

अणुशास्त्रे वा सङ्गणकीये विज्ञाने वा, पोखरणे वा आधुनिकैः .............. यत् प्रावीण्यं प्राप्तं तत् .............. धवलताम् आप्त्वा .............. सङ्कलितम् । ध्वजमध्यस्थः मां .............. जयतु विज्ञानम् इति ।

**क) द्वे सुभाषिते शुद्धे पूर्णे च लिखत ।** ४

i) सदा सद्ग्रन्थानां .............. सुकृतिनः ॥

ii) यस्य .............. बृहस्पतिः ॥

iii) वंशभवो .............. महिमानम् ॥

**ड) वृत्तनाम चिनुत ।** १

न हि प्रमादात्परमस्ति किञ्चिद्वधो नराणामिह जीवलोके ।
प्रमत्तमर्था हि नरं समन्तात् त्यजन्त्यनर्थाश्च समाविशन्ति ॥

(उपेन्द्रवज्रा / इन्द्रवज्रा / गीतिः)

## तृतीयः विभागः - स्थूलवाचनम् ।

**प्र. ३. अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् ।**

I) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १

प्रधानवर्णाः चत्वारः विदिताः ।

II) एकपदेन उत्तरं लिखत । १

धर्मसुतः नारायणः देवानां कः आसीत् ?

'विष्णुधर्मोत्तरपुराणम्' इति अस्मिन् ग्रन्थे चित्रकलाशास्त्रं विस्तरेण वर्णितं विद्यते । 'मार्कण्डेय-वज्रसंवादः' तत्र प्रख्यातः । वज्रमहाराजेन, ''लोके-परलोके सुखसाधनं किम् इति' पृष्टे सति मार्कण्डेयमुनिः चित्रकलायाः श्रेष्ठत्वम् इत्थं उक्तवान्-

यथा सुमेरुः प्रवरो नगानां
यथाण्डजानां गरुडः प्रधानः ।
यथा नराणां प्रवरः क्षितीशः
तथा कलानामिह चित्रकल्पः ।।

कलया न केवलं कलावताम् अपि तु सामान्यजनानाम् अपि सुखप्राप्तिः भवति ।

कलानां प्रवरं चित्रं धर्मकामार्थमोक्षदम् ।
माङ्गल्यं प्रथमं चैतद् गृहे यत्र प्रतिष्ठितम् ।।

अस्याः चित्रकलायाः प्रवर्तकः आसीद् धर्मसुतः नारायणः यः देवानां शिल्पी । सामान्येन चित्ररेखाः, आकारः, प्रकाशच्छाया च प्राधान्यं वहन्ति । चित्रे सादृश्यकरणं प्रधानं परिकीर्तितम् । स्थानं, प्रमाणं, मधुरत्वं, भूलम्भः, विभक्तता, सादृश्यं, क्षयः तथैव वृद्धिरित्येते अष्टगुणाः चित्रे अनुस्यूताः भवेयुः । तैः चित्रस्य सौन्दर्यं वर्धते । चित्रकलायां वर्णविन्यासे एवं चित्रकारस्य परीक्षा भवति नैपुण्यमपि च आविष्कृतं भवति । श्वेतः, रक्तः, पीतः, कृष्णः, हरितश्चैते पञ्च प्रधानवर्णाः विदिताः । द्वित्राणां सम्मिश्रणेन अवान्तरवर्णानां संख्या अगणिता वर्तते । परं सम्मिश्रणार्थं श्यामगौरवर्णौ अतीव महत्त्वपूर्णौ । रङ्गव्यतिकरैः चित्रस्य शोभा वर्धते । परमस्मिन् विषये चित्रकारस्य कल्पकता एव आवश्यकी ।

**२. पृथक्करणम् ।** २



## चतुर्थः विभागः - लेखनकौशल्यम् ।

**प्र.४. यथानिर्देशं कृतीः कुरुत । (केवलं ३ उपप्रश्नाः लेखनीयाः ।)**

**अ) कथापूर्तिः ।**

**मञ्जूषातः उचितशब्दान् चित्वा कथां पुनर्लिखत ।** ५

द्वौ श्रमणौ हिमालये पर्वतारोहणाद् ...... क्लान्तौ तौ कुत्रचिद् विश्रामं कर्तुम् अतिष्ठताम्। अत्रान्तरे ताभ्यां दृष्टं यदेका ...... स्कन्धेन किमपि भारं वहन्ती दूरतः आरोहणं करोति । यदा ...... आगता तदा दृष्टं ताभ्यां यत् तस्याः स्कन्धे एकः शिशुः वर्तते इति । अतीव स्नेहार्द्रया ...... एकः ताम् अवदत्। बाले ...... गन्तव्यम्। तया अङ्गुलिनिर्देशेन दूरस्था कुटी दर्शिता ।

(समीपम्, अतीव, कुत्र, गिरा, बालिका)

**ब) ३ पर्यायेषु १ विषयम् अधिकृत्य पञ्चवाक्यात्मकं निबन्धं लिखत ।** ५

१. सुभाषितम् । २. आकाशवाणी । ३. स्वातन्त्र्योत्सवः ।

**क) संस्कृतानुवादः ।**

**८ वाक्येषु ५ वाक्यानां संस्कृतभाषया अनुवादं कुरुत ।** ५

१. पिकलेला आंबा पिवळा असतो.
२. १९४७ साली आपल्याला स्वातंत्र्य मिळाले.
३. नदीचे पाणी स्वच्छ आहे.
४. सज्जन लोक सन्मार्गाचा त्याग करीत नाहीत.
५. माझ्याजवळ कापडाची पिशवी नेहमी असते.
६. शरीरपोषणासाठी योग्य आहार आवश्यक असतो.
७. आता रेल्वेचे आरक्षण करणे सोपे झाले आहे.
८. कापलेले झाड पुन्हा वाढते.

**ड) वाक्यरचना ।**

i) धातूनां प्रयोगः - ४ धातुषु ३ धातून् प्रयुज्य ३ वाक्यानि संस्कृतभाषया लिखत । ३

१) धातु स्निह् (४ प.प.) २) धातु रक्ष् (१ प.प.)
३) धातु कथ् (१० उ.प.) ४) धातु प्र + विश् (६ प.प.)

ii) अशुद्धिसंशोधनम् - अव्ययानि प्रयुज्य रचितेषु ४ वाक्येषु २ वाक्ययोः अशुद्धिसंशोधनं कुरुत । २

१) बाल्ये आरभ्य सः संस्कृतं वदति ।
२) भगवन्तं नमः ।
३) मात्रा समीपे वस्त्रस्यूतः वर्तते ।
४) चिन्ताम् अलम् ।

## पञ्चमः विभागः - व्याकरणम् - उपयोजनकौशल्यम् ।

**प्र.५ यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)**

**अ) क्रियापदरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

**तृतीयपुरुष-एकवचनस्य रूपाणि लेखनीयानि ।**

| धातुः | द्वितीयः भविष्यकालः | परोक्षः भूतकालः | प्रथमः भूतकालः | वर्तमानकालः | आज्ञार्थः | विध्यर्थः |
|---|---|---|---|---|---|---|
| स्मृ १ प.प. | .......... | सस्मार | ........ | ........ | ........ | स्मरेत् |
| चि ५ प.प. | .......... | ........ | अचिनोत् | ........ | चिनोतु | ........ |

**ब) नाम-सर्वनामरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| तृतीया | ...... | शशिभ्याम् | ...... |
| सप्तमी | धनवति | ...... | ...... |
| षष्ठी | ...... | ...... | आसाम् |
| प्रथमा | सर्वः | ....... | ....... |

**क) धातुसाधित-विशेषणैः कोष्ठकपूर्तिं कुरुत । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| कर्मणि विध्यर्थक-धातुसाधित-विशेषणम् | कर्मणि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्तरि वर्तमानकालवाचक-धातुसाधित-विशेषणम् | कर्तरि भूतकालवाचक-धातुसाधित-विशेषणम् |
|---|---|---|---|
| | | | |

(शयनीयम्, आदिष्टः, निरीक्षमाणा, प्रेरितवान्, स्पष्टीकुर्वन्, पठितवत्, प्रारब्धा, कर्तव्यम्)

**ड) समासाः ।**

**कोष्ठकपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| | समस्तपदम् | विग्रहः | समासनाम |
|---|---|---|---|
| i) | उपगङ्गम् | ................. । | अव्ययीभाव समास |
| ii) | अधोमुखस्य | अधः मुखं यस्य सः, तस्य । | ................. |
| iii) | शीतवासार्थम् | ................. । | चतुर्थी तत्पुरुष समास |
| iv) | अहर्निशम् | ................. । | समाहार द्वन्द्व समास |
| v) | अहितः | न विद्यते हितं यस्मिन् सः । | ................. |
| vi) | अकिञ्चनच्छात्राः | ................. । | कर्मधारय समास |
| vii) | दूरस्थः | दूरे तिष्ठति इति । | ................. |
| viii) | सुनिश्चितम् | सुष्ठु निश्चितम् । | ................. । |

**इ) वाक्यपरिवर्तनम् । (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) अहं गङ्गायां सेतुं बध्नामि । (प्रयोगं परिवर्तयत ।)

ii) दृष्टमात्रे तस्मिन् चित्रे तस्य मनः प्रहृष्टमेव । (सतिसप्तमीरचनां निष्कासयत ।)

iii) राजा काव्यं श्रुणोति । (कवि) (प्रयोजकरचनां कुरुत ।)

iv) भवान् अस्माकं जीर्णकुटीम् आगच्छतु । ( भवान् स्थाने त्वम् इति कर्तृपदं योजयत ।)

**फ) सङ्ख्यावाचकाः । (रिक्तस्थानपूर्तिः ।) (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) संवत्सरे ......... अयने स्तः । (२)

ii) मम भगिनी दिनस्य .......... देवार्चनं करोति । (एकदा)

iii) .......... मासैः फलं लभेत । (६)

iv) शाकुन्तलस्य .......... अङ्कः अतीव सुन्दरः अस्ति । (चौथा)

## षष्ठः विभागः - अनुवादकौशल्यम् ।

**प्र.६. अ) संस्कृतगद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

प्रतियोगिताप्रधानमिदं युगम् । जीवने विकासाय प्रतियोगितानां महती उपादेयता वर्तते । मानवः प्रतिस्पर्धया एव उन्नतिपथमारोहति । प्रायशः ये गुणाः बालकेषु सुप्तरूपेण विद्यन्ते, तेषां विकासाय प्रतियोगिताः अनिवार्याः एव । यदा बालाः छात्रजीवने अनेकासु प्रतियोगितासु सहभागिनः भवन्ति, यथा भाषण-निबन्धलेखन-चित्ररचना-वाद-विवाद क्रीडादीनां प्रतियोगिताः, तदा एताभिः तेषां क्षमतानां विकासः भवति । अतः जीवने सर्वाङ्गीणविकासाय प्रतियोगितासु सहभागः ग्रहीतव्यः।

**ब) संस्कृतपद्यांशौ पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

१) हृदयानि सतामेव कठिनानीति मे मतिः ।
खलवाग्विशिखैस्तीक्ष्णैर्भिद्यन्ते न मनागपि ।।

२) दक्षः श्रियमधिगच्छति पथ्याशी कल्यतां सुखमरोगी ।
अभ्यासी विद्यान्तं धर्मार्थयशांसि च विनीतः ।।

**क) संस्कृतनाट्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

(मनोरुग्णः मिलिन्दः - प्रभाते प्रतिवेशिनं प्रति गत्वा उच्चैः आक्रोशति ।)

मिलिन्दः – सखे परित्रायस्व माम्। रात्रौ मम मुखद्वारेण मार्जारशावकः उदरे प्रविष्टः । श्रुणु गुर्गुरायते ।

निनादः – वयस्य न मार्जारशावकः परमेष वातविकारः। भिषग्वरं प्रति गच्छाव ।

मिलिन्दः – न न भिषग्वरं प्रति परं शल्यक्रियाविशारदं प्रति गन्तव्यम् ।

निनादः – सत्यं खलु न मूर्खजनचित्तं समाराधयेत्। चल त्वरया ।

**Best of Luck**